International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(4): 137-144
© 2018 IJSR
www.anantaajournal.com
Received: 20-05-2018
Accepted: 23-06-2018

**स्वामी वेदार्थानन्दः**
शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्द-शैक्षिकशोधसंस्था, बेलुडमठः, हावडा, पश्चिमवङ्गाः

**Correspondence**
**स्वामी वेदार्थानन्दः**
शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्द-शैक्षिकशोधसंस्था, बेलुडमठः, हावडा, पश्चिमवङ्गाः

# अध्यारोपापवादौ ।

**स्वामी वेदार्थानन्दः**

## सारांश
अद्वैततत्त्वम् अध्यारोपापवादन्यायेन बोधयन्ति श्रुतयः आचार्याश्च । निष्प्रपञ्चस्य ब्रह्मणः स्वरूपम् बोधयितुं शास्त्राचार्याः नानाविधान् धर्मान् अध्यारोपयन्ति अपवदन्ति च। अत्र रज्जुसर्पन्यायः दृष्टान्तीभवति। उपनिषत्सु सृष्टिश्रुतिभिश्च अध्यारोप एव कृतः। तत्र जगत्सृष्टिः विवर्तोऽस्ति, न तु परिणामः इति बोधनेन श्रुत्या अपवादोऽपि क्रियते । भाष्यकारभगवत्पादानामुक्तयः अत्र श्रुतितात्पर्यनिर्णयाय उपकुर्वन्ति। एवं स्थिते वेदान्तेषु सर्वत्रापि अध्यारोपापवादप्रक्रिया एव नानाविधैः आकारभेदैः ब्रह्मप्रबोधनाय समाश्रिता इति आधुनिकाः केचन आचार्याः अभिप्रयन्ति । तेषु सच्चिदानन्देन्द्रसरस्वतीस्वामिनः प्रमुखाः। वेदान्ततत्त्वप्रबोधनाय शङ्करभगवत्पादैः सर्वत्र अध्यारोपापवादौ एव समाश्रितौ इति सच्चिदानन्दसरस्वतीस्वामिनः द्रढयन्ति। एतेषामाचार्याणाम् मते अध्यारोपापवादस्थले सर्वदाऽपि ब्रह्मैव अधिष्ठानम् भवेदित्यपि नास्ति नियमः॥

कूट शब्दः अद्वैतप्रक्रिया, अद्वैतम्, अध्यारोपः, अपवादः, उपनिषत्, जगत्, ब्रह्म, ब्रह्मबोधनम्, रज्जुसर्पन्यायः, वेदान्तप्रक्रिया, वेदार्थानन्दः, शङ्करभगवत्पादाः, सच्चिदानन्दसरस्वतीस्वामिनः, सृष्टिश्रुतयः।

## 1. प्रस्तावना
वेदान्तेषु[1] सर्वेषाम् आत्मभूतस्य ब्रह्मणः बोधनाय नानाविधाः प्रक्रियाः समाश्रिताः विद्यन्ते । ताः प्रक्रियाः वेदान्तप्रक्रियाः इति उच्यन्ते । येन प्रकारेण वेदान्तेषु आत्मस्वरूपम् ब्रह्म बोध्यते स प्रकारविशेषः एव वेदान्तप्रक्रिया इति निगद्यते ।

उपनिषत्सु ब्रह्मबोधनस्य बहुविधाः प्रक्रियाः श्रूयन्ते । पञ्चकोशविवेकप्रक्रिया, कार्यकारणविवेकप्रक्रिया, अवस्थात्रयविवेकप्रक्रिया, दृग्दृश्यविवेकप्रक्रिया इत्याद्याः

1 वेदान्तशब्दस्य उपनिषत् इत्यर्थः।

प्रक्रियाः अतीव प्रसिद्धाः। क्वचित् उपनिषदि कस्यचित् प्रक्रियाविशेषस्य प्रामुख्यं दृश्यते, अन्यस्य कस्यचित् तु प्रक्रियाविशेषस्य गौणत्वम् । यथा तैत्तिरीयोपनिषदि पञ्चकोशविवेकप्रक्रियायाः कार्यकारणविवेकप्रक्रियायाश्च प्राधान्येन अवलम्बनं कृतम् । माण्डूक्योपनिषदि तु अवस्थात्रयविवेकप्रक्रिया एव मुख्या । उपनिषत्सु स्थानभेदेन गौणमुख्यभेदः दृश्यते चेदपि आभिः सर्वाभिरपि प्रक्रियाभिः श्रुतिः एकमेव तत्त्वम् ब्रह्माख्यं सर्वात्मभूतम् बहुधा बोधयतीति आचार्याः मन्यन्ते ।

## 2. अध्यारोपापवादप्रक्रिया ।

वेदान्तशास्त्रे याः विविधाः ब्रह्मप्रबोधनप्रक्रियाः दृष्टाः तासां सर्वासाम् अपि मूलम् अध्यारोपापवादप्रक्रिया एव । अध्यारोपापवादप्रक्रिया एव अध्यारोपापवादन्यायः इत्यपि प्रोच्यते । "अध्यारोपापवादाभ्यां निष्प्रपञ्चम् प्रपञ्च्यते" [2] इतीदम् अध्यारोपापवादन्यायस्य महिमानम् उद्घोषयत् वचनं श्रीशङ्करभगवत्पादाः गीताभाष्ये उद्धरन्ति । निष्प्रपञ्चम् इति ब्रह्म उच्यते । प्रपञ्चविहीनम् एव ब्रह्म । ब्रह्म एकमेव खलु वास्तविकं तत्त्वम् । तस्मात् ब्रह्मभिन्नः अयम् प्रपञ्चः निखिलः अपि अवास्तविकः। प्रपञ्चः वास्तविकश्चेत् ब्रह्म सप्रपञ्चम् भवेत् । किन्तु प्रपञ्चः अवास्तविकः एव । अतः ब्रह्म निष्प्रपञ्चम् । इदं निष्प्रपञ्चम् ब्रह्म अध्यारोपेण अपवादेन च प्रपञ्च्यते, व्याख्यायते, बोध्यते, उपदिश्यते इति अस्य वचनस्य अर्थः।

### 2.1. अध्यारोपः।

वेदान्तसारे अध्यारोपस्य लक्षणम् इत्थम् बोधितम् – "असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपः अध्यारोपः" इति ।

सन्ध्याकाले मार्गे रज्जुं दृष्ट्वा कश्चन जनः अयं सर्पः इति चिन्तितवान् । वस्तुतः तत्र सर्पः नास्ति, केवलं रज्जुरेव वर्तते । तथापि अज्ञानवशात् स रज्जुं सर्परूपेण अपश्यत् । अनया भ्रान्त्या तस्य भयं जातम् । शरीरे कम्पनं स्वेदः इत्यादि च समुत्पन्नम् । तस्मिन् काले कश्चन बुद्धिमान् विवेकी पुरुषः तत्र समागतः। स भीतं जनं दृष्ट्वा भयस्य कारणं च ज्ञात्वा तम् उपादिशत् – अयि भोः, अत्र सर्पः कोऽपि नास्त्येव, केवलं काचन रज्जुरेव विद्यते इति । भीतः जनः तत् श्रुत्वा अपि सर्पम् एव पश्यन् अपृच्छत् – श्रीमन्, यदि सर्पः अत्र नास्ति, अपि तु केवलं रज्जुरेव विद्यते, तर्हि कथम् अहं सर्पम् एव पश्यामि इति । इदं वचनं श्रुत्वा विवेकी पुरुषः भीतस्य जनस्य विषये करुणां कुर्वन् तं विस्तरेण अबोधयत् – अयि भोः, अत्र वस्तुतः रज्जुरेव आसीत् । किन्तु अन्धकारहेतोः सा रज्जुः सर्पाकारम् प्राप्ता वर्तते । रज्जोः अग्रभागः त्वया दृश्यमानस्य सर्पस्य शिरोदेशः, रज्जोः पृष्ठभागः तस्य सर्पस्य पुच्छप्रदेशः। रज्जोरेव तमसा आवृतायाः अस्य सर्पस्य सर्वे अवयवाः समुत्पन्नाः इति । अयम् उपदेशप्रकारः एव अध्यारोपः। अत्र सर्पः एव नास्ति, येन रज्जोः तस्य उत्पत्तिः वक्तुं शक्यते । तथापि अविवेकिनः भीतस्य जनस्य दृष्टिम् अवलम्ब्य विवेकी पुरुषः रज्जोः सर्पस्य समुत्पत्तिम् बोधितवान् । रज्जौ सर्पम् आरोपितवान् इति सारः। अत्र रज्जुः एव वस्तु अथवा वास्तविकः पदार्थः। सर्पस्तु अवस्तु, अवास्तविकः पदार्थः। रज्जुः कदापि सर्पः नास्ति, अतः सा असर्पभूता । एवञ्च असर्पभूतायां रज्जौ सर्पारोपः अत्र कृतः।

यथा अयं दृष्टान्तः तथैव दार्ष्टान्तिके अपि बोध्यम् । सर्वात्मस्वरूपम् ब्रह्म एकमेव वस्तु, अन्यत् सर्वम् आकाशादिरूपेण परिदृश्यमानं जगत् अवस्तु । वयम् ब्रह्मविषयकेण अज्ञानेन ब्रह्म न जानीमः, अपि तु जगदेव जानीमः। इदं जगत् अनुभवन्तः वयं जन्मजरामरणचक्रे भ्रमामः। ब्रह्मज्ञानी जीवन्मुक्तः आचार्यः श्रुतिश्च अस्माकं दयनीयस्थितिम् उपलभ्य कृपया अस्मान् एवम् उपदिशति – हे जीवाः, संसारचक्रे मा भ्रमत, यस्माद्धि इह सच्चिदानन्दस्वरूपम् एकम् परमात्मतत्त्वमेव अस्ति । आकाशादिकं द्वितीयं नास्ति किञ्चत् । अतः कामक्रोधलोभमोहादिकं निरर्थकम् इत्यतः तत् सर्वम् परित्यज्य शान्ताः सुखिनश्च भवत इति । किन्तु इमं

---

2 भगवद्गीताशाङ्करभाष्यम् १३।१३

शास्त्राचार्योपदेशं श्रुत्वा अपि वयम् अज्ञाननिद्रातः न उत्तिष्ठामः। वयम् आचार्यादीन् इदम् पृच्छामः – यदि सच्चिदानन्दस्वरूपं सर्वात्मभूतम् एकम् ब्रह्म एव अस्ति, तर्हि कथम् परिदृश्यमानम् आकाशादिरूपम् इदं जगत् जातम् इति । अस्य समाधानाय ब्रह्मणः यथायथम् बोधनाय च श्रुतयः आचार्याश्च इदम् आहुः – वस्तुतः सच्चिदानन्दस्वरूपम् ब्रह्मैव केवलं विद्यते । तस्मात् ब्रह्मणः एव आकाशः वायुः अग्निः आपः पृथिवी चेति क्रमेण जगदिदं जातम् । ब्रह्मणः एव अज्ञानहेतोः स्थूलं सूक्ष्मञ्च अखिलं जगत् जातम् । इदमखिलं जगत् तस्मिन् एव ब्रह्मणि तिष्ठति । इदं सर्वं तत्र एव लीयते च । तस्मात् ब्रह्म एव अस्य समस्तस्य जगतः कारणम् इति । अयम् बोधनप्रकारः अध्यारोपः। वस्तुतः आत्मस्वरूपम् ब्रह्मैव सदा विद्यते । ततः अन्यत् किमपि नास्ति वस्तु । तस्मात् ब्रह्मैव वस्तु, इदं जगत् अखिलमपि अवस्तु । तथापि एतत् अद्वैतसत्यम् अजानतां जगत् च पश्यताम् अस्माकं व्यावहारिकदृष्टिम् अवलम्ब्य श्रुतयः आचार्याश्च जगतः कारणम् ब्रह्म इति प्रथमं कल्पयन्ति । ब्रह्मणि जगत् आरोपयन्ति इत्यर्थः। वस्तुनि अवस्त्वारोपं कुर्वन्ति इति सारः।

### 2.2. अपवादः।

अध्यारोपेण अपवादेन च अद्वैतम् बोध्यते इति पूर्वमेव उक्तम् । अध्यारोपमात्रेण तु वस्तुस्थितिः न बोधिता भवति । वास्तविकं तत्त्वम् बोधनीयं चेत् अध्यारोपानन्तरम् अपवादः अपि कर्तव्यः। अपवादस्य वेदान्तसारे लक्षणम् उक्तम् – "अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद् वस्तुविवर्तस्य अवस्तुनः अज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्" इति ।

रज्जुसर्पदृष्टान्तम् एव आश्रित्य अपवादस्य अपि स्वरूपं ज्ञातुं शक्यते । दृश्यमानः सर्पः रज्जुविषयकात् अज्ञानात् एव जातः, रज्जुरेव सर्पाकारेण वर्तते, रज्जुरेव सर्पस्य कारणम् इत्यादिरूपेण अध्यारोपः कृतः। तदनन्तरम् उपदेष्टा विवेकी पुरुषः अपवादम् अपि करोति – पश्य, अयं सर्पः रज्जोः एव जातश्चेदपि वस्तुतः अस्य रज्जुरेव स्वरूपम् । अत्र सर्पे रज्जुभिन्नं किमपि नास्ति । रज्जुरेव अस्य सर्पस्य शिरः, रज्जुरेव अस्य सर्पस्य पुच्छम्, रज्जुरेव अस्य सर्पस्य मध्यभागः। अयं सम्पूर्णोऽपि सर्पः रज्जुरेव । अतः सर्पः रज्जोः वस्तुतः न उत्पद्यते, अपि तु रज्जुः सर्परूपेण भासते । रज्जोः सर्पस्य उत्पत्तिः अवास्तविकी । तस्मात् अयं न सर्पः, अपि तु रज्जुरेव केवलम् । रज्जुरेव अत्र सत्यम्, सर्पस्तु मिथ्या इति । श्रोता बुद्धिमान् चेत् पूर्वोक्तम् अध्यारोपम् इमम् अपवादञ्च श्रुत्वा अवश्यमेव रज्जुज्ञानम् अवाप्स्यति, सर्पभ्रान्तेश्च मुक्तः भवति ।

एवमेव दार्ष्टान्तिके अपि ज्ञेयम् । श्रुतिः गुरुः वा आदौ प्रपञ्चम् ब्रह्मणि अध्यारोपयति । ब्रह्मणः एव आकाशादिक्रमेण सम्पूर्णः अपि प्रपञ्चः जातः, ब्रह्म एव प्रपञ्चरूपेण स्थितः, ब्रह्म एव निखिलस्य अपि प्रपञ्चस्य कारणम् इत्येवंरूपेण अध्यारोपः क्रियते । ततः अपवादम् उपन्यस्यति – ब्रह्म नित्यम् । अतः एव अन्यस्मात् कस्माच्चित् अपि कारणात् ब्रह्म न जायते, ब्रह्मणः सकाशात् अन्यत् किमपि न जायते च । तत् ब्रह्म सर्वव्यापि, शुद्धम्, अद्वैतम् । ब्रह्मभिन्नं किमपि नास्ति । तस्मात् ब्रह्मणः प्रपञ्चः वस्तुतः न उत्पद्यते, अपि तु अज्ञानवशात् मरुमरीचिकावत् भासते । ब्रह्मणः सकाशात् प्रपञ्चस्य उत्पत्तिः वास्तविकी नास्ति । अवास्तविकी उत्पत्तिः एव विवर्तः इति उच्यते । वास्तविकी उत्पत्तिः परिणामः इति कथ्यते । ब्रह्मणः सकाशात् प्रपञ्चस्य उत्पत्तिः विवर्तः। एवञ्च ब्रह्म जगदाकारेण विवर्तते इत्येव युक्तम् । अतः अयम् प्रपञ्चः वस्तुतः नास्ति, ब्रह्म एव केवलम् अस्ति । ब्रह्मैव सत्यम्, जगत् मिथ्या इति । यः साधनचतुष्टयसम्पन्नः अधिकारी साधकः सः पूर्वोक्तम् अध्यारोपम् इमम् अपवादञ्च श्रुत्वा आत्मस्वरूपम् ब्रह्म साक्षात्करोति, संसारभ्रमाच्च मुक्तः भवति ।

## 3. सृष्टिश्रुतिभिः अध्यारोपापवादप्रक्रियायाः सम्बन्धः।

उपनिषत्सु जगत्सृष्टिः बहुधा श्रूयते । तत्र सर्वत्र अपि जगतः कारणम् ब्रह्म इत्युक्तम् । ब्रह्मणः एव सकाशात् आकाशादिक्रमेण जगत् जातम् इति सृष्टिश्रुतयः अस्मान् बोधयन्ति । एवम् ब्रह्मणः कारणत्वं जगतः कार्यत्वञ्च सृष्टिश्रुतयः बोधयन्ति इत्येतत् सत्यम्, किन्तु परमार्थतः ब्रह्म जगत्कारणमिति सृष्टिश्रुतीनां तात्पर्यं नास्ति

। ब्रह्म न कस्यचित् कार्यम्, न वा कस्यचित् कारणम् । अतः एव कठोपनिषदि श्रूयते – "नायं कुतश्चिन्न बभूव कश्चित्"[3] इति । परमात्मा कुतश्चिदपि कारणात् न सम्भूतः, न वा कश्चिदपि परमात्मनः सकाशात् सम्भूतः इति अस्य मन्त्रांशस्य अर्थः। ब्रह्म एकमेव वस्तु, तद्भिन्नं यद् यद् अस्माभिः प्रतीयते तत् अखिलमपि अवास्तविकम्, यथा रज्जौ दृश्यमानः सर्पः। वास्तविकात् ब्रह्मणः अवास्तविकस्य जगतः सृष्टिः अवास्तविकी एव भवति । अवास्तविक्यां सृष्टौ कारणत्वं कार्यत्वञ्च अवास्तविकम् । तस्मात् ब्रह्मणः कारणत्वं जगतः कार्यत्वञ्च अवास्तविकम्, मिथ्याभूतम् । जगद्रूपेण यत् प्रतीयते तत् ब्रह्मैव केवलम्, तस्मात् इह न किमपि कारणं विद्यते न वा किमपि कार्यम् । एकमेव अद्वितीयम् ब्रह्म भवति तत्त्वम् । तस्मात् अध्यारोपार्थमेव श्रुतयः जगत्सृष्टिम् बोधयन्ति ।

एवम् उपनिषत्सु यत्र सृष्टिश्रुतिभिः अध्यारोपः कृतः तत्र अपवादः कथं क्रियते इति भवति शङ्का । उच्यते – जगत्सृष्टिः विवर्तः अस्ति, न तु परिणामः इति बोधनेन तत्र अपवादः क्रियते ।

तथा हि, वस्तुनः तत्समसत्ताकः अन्यथाभावः परिणामः। वस्तुनः तद्विषमसत्ताकः अन्यथाभावः विवर्तः। सर्वस्य अपि वस्तुनः काचन सत्ता विद्यते । अद्वैतवेदान्तदर्शने सत्तायाः त्रैविध्यम् प्रसिद्धम् – पारमार्थिकसत्ता, व्यावहारिकसत्ता, प्रातिभासिकसत्ता चेति । सर्वात्मस्वरूपस्य परब्रह्मणः सत्तैव पारमार्थिकसत्ता इति कथ्यते । ब्रह्मविषयकाज्ञानेन जातस्य परिदृश्यमानस्य अस्य जगतः सत्ता व्यावहारिकसत्ता इत्युच्यते । व्यावहारिके जगति अज्ञानवशात् रज्ज्वादौ वस्तुनि प्रतिभातस्य सर्पादेः सत्ता प्रातिभासिकसत्ता इति प्रोच्यते । एवं स्थिते यदा एकस्मात् कस्माचित् वस्तुनः तत्समानसत्ताकम् अन्यत् किमपि उत्पद्यते तदा सा उत्पत्तिः परिणामः इति व्यपदिश्यते, यथा तन्तुभ्यः पटस्य उत्पत्तिः। तन्तूनां सत्ता व्यावहारिकसत्ता, सा एव पटस्य अपि सत्ता । यदा पुनः तद्विषमसत्ताकं किमपि उत्पद्यते तदा सा उत्पत्तिः विवर्तः इति व्यपदेशम् अर्हति, यथा रज्जोः सर्पस्य उत्पत्तिः। रज्जोः सत्ता व्यावहारिकसत्ता, रज्जुविषयकाज्ञानेन जातस्य सर्पस्य सत्ता तु प्रातिभासिकसत्ता ।

रज्जुरेव मार्गे विद्यते चेदपि अन्धकारहेतोः तस्याः सर्पाकारेण प्रतीतिः भवति । इयम् प्रतीतिः अवास्तविकी, स सर्पः अवास्तविकः, प्रातिभासिकः। रज्जुरेव केवलं सत्यम् । तथापि इदं रज्जुमात्रस्य सत्यत्वं सर्पदर्शनेन भ्रान्तः जनः न अवगच्छति । स पृच्छति – यदि केवलं रज्जुरेव अस्ति कथम् अयं सर्पः जातः इति । सर्पः जातः एव इति सः जनः चिन्तयति । यदि न जातः कथं स सर्पः दृश्येत । सर्पः दृश्यते इत्यतः स अवश्यमेव कुतश्चित् कारणात् जातः इति चिन्तयित्वा स जनः सर्पस्य कारणं ज्ञातुम् इच्छति । तदा रज्जुज्ञानवान् पुरुषः रज्जोः सकाशात् प्रातिभासिकस्य सर्पस्य उत्पत्तिम् बोधयति । किन्तु सा उत्पत्तिः वास्तविकी इति न बोधयति । वास्तविके पदार्थे अवास्तविकस्य प्रातिभासिकस्य पदार्थस्य प्रतीतिः यत्र जायते तत्र वास्तविकी उत्पत्तिः न जाता । रज्जौ यः सर्पः प्रतीयते तस्य सर्पस्य तस्याः रज्जोः अवास्तविकी एव उत्पत्तिः जाता । वास्तविकी उत्पत्तिश्चेत् स सर्पः अपि रज्जुवदेव वास्तविकः स्यात् । न स सर्पः वास्तविकः, अन्धकारे अज्ञानवशात् प्रतीयते एव स केवलम् । तस्मात् रज्जौ सर्पप्रतीतिः विवर्तः। अवास्तविकी उत्पत्तिः एव विवर्तः। रज्जुसर्पस्थले यथा तथैव जगद्ब्रह्मणोर्विषये अपि भवति । ब्रह्मणः पारमार्थिकसत्ता, ब्रह्मविषयकाज्ञानेन उत्पन्नस्य जगतस्तु व्यावहारिकसत्ता । अतः ब्रह्मणः सकाशात् जगतः उत्पत्तिः विवर्तः एव, न तु परिणामः।

विवर्तः सर्वदा अपि अधिष्ठानविषयकेण अज्ञानेन भवति । रज्जुसर्पस्थले रज्जुः अधिष्ठानम् । सर्पः तत्र अध्यस्तम् अथवा आरोपितम् । शुक्तिरजतस्थले शुक्तिः अधिष्ठानम् । तत्र रजतम् अध्यस्तम् । जगद्ब्रह्मस्थले ब्रह्म अधिष्ठानम् । जगत् तत्र अध्यस्तम् । अत्र सर्वत्रापि अधिष्ठानविषयकेण अज्ञानेन एव अध्यस्तं वस्तु जायते । अधिष्ठानविषयकेण ज्ञानेन तु तत् अध्यस्तं वस्तु निवर्तते । अज्ञानेन प्रतिभातं हि तत्, न तु तत् वस्तुतः अस्ति । तस्मात् यदा कस्माचित् कारणात् कार्योत्पत्तिः

3 कठोपनिषत् १।२।१८

कारणस्वरूपविषयकेण अज्ञानेन जाता इति अवगम्यते, अतः एव सा कार्योत्पत्तिः विवर्तः इति ज्ञायते, तदा तत् कार्यं वस्तुतः न जातमिति तत् कारणं वस्तुतः कारणमेव नास्तीति च वयं जानीमः। एवञ्च श्रुतयः यदा ब्रह्मणः जगत्सृष्टिम् प्रतिपाद्य तदनन्तरं सा सृष्टिः विवर्तः एव इति ज्ञापयन्ति तदा तस्याः सृष्टेः वास्तविकता नास्ति इति वयम् अवगच्छामः। तादृश्या सृष्ट्या जातस्य प्रपञ्चस्य पारमार्थिकता नास्तीति च वयम् प्रतिपद्यामहे । यद्विषयकेण अज्ञानेन अयम् प्रपञ्चः दृष्टः तदेव वस्तु सर्वात्मभूतम् ब्रह्म पारमार्थिकम् इति वयं तदा निश्चिनुमः। एवंरूपेण श्रुतयः अपवादं कुर्वन्ति । तस्मात् सृष्टेः विवर्तता ज्ञापनेन एव अपवादः क्रियते उपनिषत्सु ।

एवञ्च सृष्टिबोधकश्रुतयः अध्यारोपार्थकाः, सृष्टेः विवर्तताप्रतिपादकाः श्रुतयः अपवादात्मकाश्च भवन्ति । अयम् एव सृष्टिश्रुतिभिः अध्यारोपापवादप्रक्रियायाः सम्बन्धः।

**4. अध्यारोपापवादप्रक्रियायाः विषये भाष्यकाराणाम् उक्तिः।**

ब्रह्मबोधने अध्यारोपापवादप्रक्रिया अपरिहार्या वर्तते । अध्यारोपम् अपवादञ्च विना ब्रह्म बोधयितुं न शक्यम् । अत एव श्रीशङ्करभगवत्पादाः भाष्येषु प्रत्यक्षतः परोक्षतः वा अध्यारोपापवादप्रक्रियाम् एव बहुधा आश्रित्य आत्मतत्त्वम् प्रबोधयन्ति । भगवत्पादाः क्वचित् वेदान्तसम्मतायाः अस्याः प्रक्रियायाः स्वरूपमपि विस्तारयन्ति । बृहदारण्यकोपनिषद्भाष्ये भाष्यकारभगवत्पादाः आहुः – "य एवं यथोक्तम् आत्मानम् अभयम् ब्रह्म वेद सोऽभयं हि वै ब्रह्म भवति । एष सर्वस्याः उपनिषदः संक्षिप्तोऽर्थः उक्तः। एतस्य एव अर्थस्य सम्यक् प्रबोधाय उत्पत्तिस्थितिप्रलयादिकल्पना क्रियाकारकफलाध्यारोपणा च आत्मनि कृता । तदपोहेन च नेति नेतीति अध्यारोपितविशेषापनयद्वारेण पुनः तत्त्वम् आवेदितम् । तथा एकप्रभृत्यापरार्धसङ्ख्यास्वरूपपरिज्ञानाय रेखाध्यारोपणं कृत्वा एकेयं सङ्ख्या, दशेयम्, शतेयम्, सहस्रेयम् इति ग्राहयति । अवगमयति सङ्ख्यास्वरूपं केवलम्, न तु सङ्ख्याया रेखात्मत्वमेव । यथा च अकारादीन्यक्षराणि विजिग्राहयिषुः पत्रमषीरेखादिसंयोगोपायम् आस्थाय वर्णानां सतत्त्वम् आवेदयति, न पत्रमष्याद्यात्मताम् अक्षराणां ग्राहयति तथा चेह उत्पत्त्याद्यनेकोपायमास्थायैकम् ब्रह्मतत्त्वम् आवेदितम् । पुनः तत्कल्पितोपायजनितपरिशोधनार्थं नेति नेतीति तत्त्वोपसंहारः कृतः"[4] इति ।

अत्र भाष्यभागे भगवत्पूज्यपादैः "एतस्य एव अर्थस्य सम्यक् प्रबोधाय उत्पत्तिस्थितिप्रलयादिकल्पना क्रियाकारकफलाध्यारोपणा च आत्मनि कृता" इति यत् उक्तं तत् अध्यारोपविषये उक्तम् । आत्मा ब्रह्म एव इत्यस्य अर्थस्य सम्यक् प्रबोधाय उपनिषत्सु ब्रह्मणः सकाशात् जगतः उत्पत्तिः, ब्रह्मणि एव जगतः स्थितिः, तत्र एव जगतः प्रलयश्च बोध्यते । जगत् ब्रह्मविषयिण्या अविद्यया जातम् । तस्मात् ब्रह्मणः विवर्तकार्यं जगत्, ब्रह्म च जगतः विवर्तकारणम् । अतः एव जगतः उत्पत्तिस्थितिप्रलयकारणम् ब्रह्म एव इति प्रकारेण ब्रह्मणि जगत्कारणत्वं यत् कल्पितं तत् अध्यारोपणम् एव इत्यवगम्यते ।

यथा ब्रह्मणि जगदुत्पत्तिस्थितिलयकारणत्वम् अध्यारोप्यते तथा क्रियाकारकफलानि च अध्यारोप्यन्ते । ब्रह्म निष्क्रियम् । अतः एव ब्रह्म न विक्रियते । किञ्च ब्रह्म कस्याश्चिदपि क्रियायाः कर्ता वा कर्म वा करणं वा सम्प्रदानं वा अपादानं वा अधिष्ठानं वा न भवति । क्रियायाः कारकं नास्ति ब्रह्म इत्यर्थः। क्रियाजन्यं यत् फलम् उत्पत्त्याप्तिविकारसंस्कारादिरूपम् पुण्यपापरूपं वा तदपि आत्मस्वरूपे ब्रह्मणि न सम्बध्यते । अतः एव ब्रह्म सर्वसंसारधर्मवर्जितं नित्यशुद्धबुद्धमुक्तस्वरूपम् । एवम्प्रकारेण ब्रह्मणि क्रियाकारकफलानि न सन्ति चेदपि व्यावहारिकप्रपञ्चे जीवात्मनि क्रियाकारकफलानि अनुभवताम् अज्ञानिनाम् संशयान् निवर्तयितुं श्रुतिः ब्रह्मणि क्रियाकारकफलानि अध्यारोपयति ।

एतेषां सर्वविधानाम् अपि अध्यारोपाणाम् अपवादः अपि श्रुत्या क्रियते । अपवादार्थं श्रुतिः जगत्सृष्टेः विवर्तमात्रत्वम् बोधयन्ती अध्यारोपितम् अखिलं निवर्तयति । "नेति नेति" इति श्रुतिवाक्यम् इदमेव करोति । नेति इति निषेधमुखेन ब्रह्मणि अध्यारोपितस्य

4 बृहदारण्यकशाङ्करभाष्यम् ४।४।२५

आकाशादिप्रपञ्चजातस्य क्रियाकारकफलादेश्च अपवादे कृते तत्त्वं स्वरूपतः बोधितं स्यात् ।

**5. अध्यारोपापवादविषये आधुनिकानाम् आचार्याणाम् मतम् ।**

वेदान्तेषु प्रसिद्धाः पञ्चकोशविवेकः, अवस्थात्रयविवेकः, कार्यकारणविवेकः, दृग्दृश्यविवेकः इत्याद्याः प्रक्रियाः सर्वाः अपि अध्यारोपापवादप्रक्रियायाः एव रूपभेदाः इति केचन आधुनिकाः वेदान्ताचार्याः मन्यन्ते। वेदान्तेषु सर्वत्रापि अध्यारोपापवादप्रक्रिया एव नानाविधैः आकारभेदैः ब्रह्मप्रबोधनाय समाश्रिता इति इमे आचार्याः प्रदर्शयन्ति। तेषु सच्चिदानन्देन्द्रसरस्वतीस्वामिनः प्रमुखाः। ते आहुः – "प्रत्यस्तमितसर्वविशेषेऽपि सर्वात्मत्वेन नित्यप्राप्तेऽपि च ब्रह्मणि आप्यत्वं श्रुतिषु कुत्रचिद् अध्यारोप्य ज्ञानातिरिक्तसाधनप्राप्यत्वाशङ्का अपोद्यते। एवं क्वचिज्ज्ञेयत्वमध्यारोप्य ब्रह्मातिरिक्ते वस्तुनि ज्ञेयत्वमपोद्यते, क्वचित्तस्मिन्नेव ज्ञातृत्वमध्यारोप्य ज्ञेयत्वमपह्नूयते । क्वचित्तु साक्षित्वमध्यारोप्य ज्ञातृत्वमपि निराक्रियते । क्वचित् पुनः स्वरूपमेवापेक्ष्य नेति नेतीति साक्षित्वमपि निराक्रियते । एवं क्वचिद् वाक्यगम्यत्वमङ्गीकृत्य प्रत्यक्षाद्यगम्यत्वम् बोध्यते, क्वचित्तु वाङ्मनसयोरप्यगोचरत्वं स्वरूपापेक्षया स्वीकृत्य वाक्यगम्यत्वम् मनोगम्यत्वञ्च निराक्रियते। एवमेव जगत्कारणत्वम् ब्रह्मण्यध्यारोप्य तस्य कार्यत्वपह्नूयते, ततः कारणत्वमप्यपह्नुत्य स्वरूपमेवावेद्यते। पञ्चकोशात्मकत्वं क्रमक्रमेणाध्यारोप्य पूर्वपूर्वस्यात्मत्वं निराकृत्य पञ्चकोशातीतत्वमवगमय्य सर्वद्वैतातीतत्वं विज्ञाप्यते। तथा दृक्त्वारोपेण दृश्यत्वापह्नवः क्वचित्, ततो द्वैतराहित्यमवबोध्य तस्यापि निराकरणम्। अवस्थात्रयवत्त्वमध्यारोप्य पूर्वपूर्वावस्थावत्त्वनिरासः, ततस्तुरीयत्वबोधनेनावस्थावत्त्वमात्रस्य निरासः। किम् बहुना ब्रह्मस्वरूपबोधनार्थं यद्यदध्यारोप्यते तत्तदपह्नूयते स्वरूपे एव बुद्धिविश्रान्तिर्यथा स्यादिति ।"[5] इति ।

बोधसौकर्याय अत्रोक्तानाम् अध्यारोपाणाम् अपवादानाञ्च काचन तालिका अत्र प्रदर्श्यते –

अध्यारोपापवादप्रक्रियया ब्रह्मबोधने सर्वदा अपि अधिष्ठानम् ब्रह्म एव भवेत् इति नास्ति नियमः इति अस्याः तालिकायाः अवगम्यते । तथा हि अत्र सच्चिदानन्देन्द्रसरस्वतीस्वामिभिः उक्तम् – "क्वचिज्ज्ञेयत्वमध्यारोप्य ब्रह्मातिरिक्ते वस्तुनि ज्ञेयत्वमपोद्यते"[6] इति । अत्र ब्रह्मणि ज्ञेयत्वस्य अध्यारोपः क्रियते, ब्रह्मभिन्ने अनात्मभूते वस्तुनि ज्ञेयत्वस्य अपवादः क्रियते । किमर्थम् एवम् ब्रह्मणि ज्ञेयत्वमध्यारोप्य ब्रह्मभिन्ने वस्तुनि तत् अपोद्यते इति चेदुच्यते – ब्रह्म एव ज्ञेयम्, ब्रह्मज्ञानम् एव यथार्थं ज्ञानम्, ब्रह्मज्ञानम् एव मुक्तिदायकम्, अन्यत् ज्ञानं सर्वम् अनर्थकं संसारकारणम् इति बोधनाय इति ।

**6. उपसंहारः।**

अद्वैतं वाचाम् अगोचरम् इत्यस्ति श्रुतिप्रसिद्धं वचः[7]। तथापि तदद्वैतम् अध्यारोपापवादाभ्यां शक्यते बोधयितुम् इत्यपि निरूपयन्ति आचार्याः। शाङ्कराद्वैतवेदान्तावगतिः अध्यारोपापवादप्रक्रियायाः अनुसरणेनैव भवति इत्यतः तस्याः प्रक्रियायाः स्वरूपम् आदौ यत्नेन बोध्यम्। तत्रायं लेखः प्रयोजनवती स्याद् इत्याशास्महे॥

5 वेदान्तप्रक्रियाप्रत्यभिज्ञा, पृष्ठसंख्या २८

6 वेदान्तप्रक्रियाप्रत्यभिज्ञा, पृष्ठसंख्या २८

7 "नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा" – कठोपनिषत् ६।१२

| स्वामिनां वाक्यम् | अध्यारोपाधिष्ठानम् | अध्यारोपितो धर्मः | अपवादाधिष्ठानम् | अपोदितो धर्मः |
|---|---|---|---|---|
| प्रत्यस्तमितसर्वविशेषेऽपि सर्वात्मत्वेन नित्यप्राप्तेऽपि च ब्रह्मणि आप्यत्वं श्रुतिषु कुत्रचिद् अध्यारोप्य ज्ञानातिरिक्तसाधनप्राप्यत्वाशङ्का अपोद्यते। | ब्रह्म | आप्यत्वम् | ब्रह्म | ज्ञानातिरिक्तसाधनप्राप्यत्वम् |
| एवं क्वचिज्ज्ञेयत्वमध्यारोप्य ब्रह्मातिरिक्ते वस्तुनि ज्ञेयत्वमपोद्यते । | ब्रह्म | ज्ञेयत्वम् | ब्रह्मभिन्नं वस्तु | ज्ञेयत्वम् |
| क्वचित्तस्मिन्नेव ज्ञातृत्वमध्यारोप्य ज्ञेयत्वमपह्नूयते । | ब्रह्म | ज्ञातृत्वम् | ब्रह्म | ज्ञेयत्वम् |
| क्वचित्तु साक्षित्वमध्यारोप्य ज्ञातृत्वमपि निराक्रियते । | ब्रह्म | ज्ञातृत्वम् | ब्रह्म | ज्ञेयत्वम् |
| क्वचित् पुनः स्वरूपमेवापेक्ष्य नेति नेतीति साक्षित्वमपि निराक्रियते । | ब्रह्म | साक्षित्वम् | ब्रह्म | ज्ञातृत्वम् |
| एवं क्वचिद् वाक्यगम्यत्वमङ्गीकृत्य प्रत्यक्षाद्यगम्यत्वम् बोध्यते । | | | ब्रह्म | साक्षित्वम् |
| क्वचित्तु वाङ्मनसयोरप्यगोचरत्वं स्वरूपापेक्षया स्वीकृत्य वाक्यगम्यत्वम् मनोगम्यत्वञ्च निराक्रियते । | ब्रह्म | वेदान्तवाक्यगम्यत्वम् | ब्रह्म | प्रत्यक्षादिप्रमाणागम्यत्वम् |
| एवमेव जगत्कारणत्वम् ब्रह्मण्यध्यारोप्य तस्य कार्यत्वपह्नूयते । | ब्रह्म | जगत्कारणत्वम् | ब्रह्म | कार्यत्वम् |
| ततः कारणत्वमप्यपह्नुत्य स्वरूपमेवावेद्यते। | | | ब्रह्म | जगत्कारणत्वम् |
| पञ्चकोशात्मकत्वं क्रमक्रमेणाध्यारोप्य पूर्वपूर्वस्यात्मत्वं निराकृत्य पञ्चकोशातीतत्वमवगमय्य सर्वद्वैतातीतत्वं विज्ञाप्यते । | ब्रह्म | अन्नमयकोशत्वम् | ब्रह्म | आकाशाद्यन्नपर्यन्तबाह्यप्रपञ्चात्मकत्वम् |
| | ब्रह्म | प्राणमयकोशत्वम् | ब्रह्म | अन्नमयकोशत्वम् |
| | ब्रह्म | मनोमयकोशत्वम् | ब्रह्म | प्राणमयकोशत्वम् |
| | ब्रह्म | विज्ञानमयकोशत्वम् | ब्रह्म | मनोमयकोशत्वम् |
| | ब्रह्म | आनन्दमयकोशत्वम् | ब्रह्म | विज्ञानमयकोशत्वम् |
| | ब्रह्म | पञ्चकोशातीतपुच्छब्रह्मत्वम् / सर्वद्वैतातीतत्वम् | ब्रह्म | आनन्दमयकोशत्वम् |
| तथा दृक्त्वारोपेण दृश्यत्वापह्नवः क्वचित् । | ब्रह्म | दृक्त्वम् | ब्रह्म | दृश्यत्वम् |
| ततो द्वैतराहित्यमवबोध्य तस्यापि निराकरणम् । | ब्रह्म | द्वैतराहित्यम् | ब्रह्म | दृक्त्वम् |
| अवस्थात्रयवत्त्वमध्यारोप्य पूर्वपूर्वावस्थावत्त्वनिरासः, ततस्तुरीयत्वबोधनेनावस्थावत्त्वमात्रस्य निरासः। | ब्रह्म | स्वप्नावस्थावत्त्वम् | ब्रह्म | जाग्रदवस्थावत्त्वम् |
| | ब्रह्म | सुषुप्त्यवस्थावत्त्वम् | ब्रह्म | स्वप्नावस्थावत्त्वम् |
| | ब्रह्म | तुरीयत्वम् | ब्रह्म | सुषुप्त्यवस्थावत्त्वम् |
| | | | ब्रह्म | अवस्थावत्त्वम् |

### संदर्भ सूची

1 बालसुब्रह्मण्यन्, टि के (सम्पादकः)। *श्रीशङ्करग्रन्थावलिः* (Complete Works of Sri Sankaracharya in 10 Volumes)। समता- बुक्स्। चेन्नै। १९९९ (प्रथममुद्रणम् १९१०)।

2 श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः। *वेदान्तप्रत्यभिज्ञा।* अध्यात्मप्रकाशकार्यालयः। होळेनरसीपुरम्। १९६४।